# শ্রীশনৈশ্চরসহস্রনামস্তোত্রম্

{॥ শ্রীশনৈশ্চরসহস্রনামস্তোত্রম্ ॥}

অস্য শ্রীশনৈশ্চরসহস্রনামস্তোত্র মহামন্ত্রস্য ।

কাশ্যপ ঋষিঃ । অনুষ্টুপ্ ছন্দঃ ।

শনৈশ্চরো দেবতা । শম্ বীজম্ ।

নম্ শক্তিঃ । মম্ কীলকম্ ।

শনৈশ্চরপ্রসাদাসিদ্ধ্যর্থে জপে বিনিয়োগঃ ।

শনৈশ্চরায অঙ্গুষ্ঠাভ্যাং নমঃ ।

মন্দগতযে তর্জনীভ্যাং নমঃ ।

অধোক্ষজায মধ্যমাভ্যাং নমঃ ।

সৌরযে অনামিকাভ্যাং নমঃ ।

শুষ্কোদরায কনিষ্ঠিকাভ্যাং নমঃ ।

ছাযাত্মজায করতলকরপৃষ্ঠাভ্যাং নমঃ ।

শনৈশ্চরায হৃদযায নমঃ ।

মন্দগতযে শিরসে স্বাহা ।

অধোক্ষজায শিখাযৈ বষট্ ।

সৌরযে কবচায হুম্ ।

শুষ্কোদরায নেত্রত্রযায বৌষট্ ।

ছাযাত্মজায অস্ত্রায ফট্ ।

ভূর্ভুবঃ সুবরোমিতি দিগ্বন্ধঃ ।

। ধ্যানম্ ।

Stotram Digitalized By Sanskritdocuments.org

চাপাসনো গৃধ্রধরস্তু নীলঃ

প্রত্যঙ্মুখঃ কাশ্যপ গোত্রজাতঃ ।

সশূলচাপেষু গদাধরোঽব্যাত্

সৌরাষ্ট্রদেশপ্রভবশ্চ শৌরিঃ ॥

নীলাম্বরো নীলবপুঃ কিরীটী

গৃধ্রাসনস্থো বিকৃতাননশ্চ ।

কেযূরহারাদিবিভূষিতাঙ্গঃ

সদাঽস্তু মে মন্দগতিঃ প্রসন্নঃ ॥

ওঁ ॥ অমিতাভাষ্যঘহরঃ অশেষদুরিতাপহঃ ।

অঘোররূপোঽতিদীর্ঘকাযোঽশেষভযানকঃ ॥ ১॥

অনন্তো অন্নদাতা চাশ্বত্থমূলজপপ্রিযঃ ।

অতিসম্পৎপ্রদোঽমোঘঃ অন্যস্তুত্যা প্রকোপিতঃ ॥ ২॥

অপরাজিতো অদ্বিতীযঃ অতিতেজোঽভযপ্রদঃ ।

অষ্টমস্থোঽঞ্জননিভঃ অখিলাত্মার্কনন্দনঃ ॥ ৩॥

অতিদারুণ অক্ষোভ্যঃ অপ্সরোভিঃ প্রপূজিতঃ ।

অভীষ্টফলদোঽরিষ্টমথনোঽমরপূজিতঃ ॥ ৪॥

অনুগ্রাহ্যো অপ্রমেয পরাক্রম বিভীষণঃ।

অসাধ্যযোগো অখিল দোষঘ্নঃ অপরাকৃতঃ ॥ ৫॥

অপ্রমেযোঽতিসুখদঃ অমরাধিপপূজিতঃ।

অবলোকাত্ সর্বনাশঃ অশ্বত্থাম দ্বিরাযুধঃ ॥ ৬॥

অপরাধসহিষ্ণুশ্চ অশ্বত্থাম সুপূজিতঃ।

অনন্তপুণ্যফলদো অতৃপ্তোঽতিবলোঽপি চ ॥ ৭॥

অবলোকাত্ সর্ববন্দ্যঃ অক্ষীণকরুণানিধিঃ।

অবিদ্যামূলনাশশ্চ অক্ষয্যফলদাযকঃ ॥ ৮॥

আনন্দপরিপূর্ণশ্চ আযুষ্কারক এব চ।

আশ্রিতেষ্টার্থবরদঃ আধিব্যাধিহরোঽপি চ ॥ ৯॥

আনন্দময আনন্দকরো আযুধধারকঃ।

আত্মচক্রাধিকারী চ আত্মস্তুত্যপরাযণঃ ॥ ১০॥

আযুষ্করো আনুপূর্ব্যঃ আত্মাযত্তজগত্রযঃ।

আত্মনামজপপ্রীতঃ আত্মাধিকফলপ্রদঃ ॥ ১১॥

আদিত্যসংভবো আর্তিভঞ্জনো আত্মরক্ষকঃ।

আপদ্বান্ধব আনন্দরূপো আয়ুঃপ্রদোঽপি চ ॥ ১২॥

আকর্ণপূর্ণচাপশ্চ আত্মোদ্দিষ্ট দ্বিজপ্রদঃ ।

আনুকূল্যো আত্মরূপ প্রতিমাদান সুপ্রিয়ঃ ॥ ১৩॥

আত্মারামো আদিদেবো আপন্নার্তি বিনাশনঃ ।

ইন্দিরার্চিতপাদশ্চ ইন্দ্রভোগফলপ্রদঃ ॥ ১৪॥

ইন্দ্রদেবস্বরূপশ্চ ইষ্টেষ্টবরদাযকঃ ।

ইষ্টাপূর্তিপ্রদ ইন্দুমতীষ্টবরদাযকঃ ॥ ১৫॥

ইন্দিরারমণপ্রীত ইন্দ্রবংশনৃপার্চিতঃ ।

ইহামুত্রেষ্টফলদ ইন্দিরারমণার্চিতঃ ॥ ১৬॥

ঈদ্রিয ঈশ্বরপ্রীত ঈষণাত্রযবর্জিতঃ ।

উমাস্বরূপ উদ্বোধ্য উশনা উৎসবপ্রিয়ঃ ॥ ১৭॥

উমাদেব্যর্চনপ্রীত উচ্চস্থোচ্চফলপ্রদঃ ।

উরুপ্রকাশ উচ্চস্থ যোগদ উরুপরাক্রমঃ ॥ ১৮॥

ঊর্ধ্বলোকাদিসঞ্চারী ঊর্ধ্বলোকাদিনাযকঃ ।

ঊর্জস্বী ঊনপাদশ্চ ঋকারাক্ষরপূজিতঃ ॥ ১৯॥

ঋষিপ্রোক্ত পুরাণজ্ঞ ঋষিভিঃ পরিপূজিতঃ ।

ঋগ্বেদবন্দ্য ঋগ্রূপী ঋজুমার্গ প্রবর্তকঃ ॥ ২০॥

লুঠিতোদ্ধারকো লূত ভবপাশপ্রভঞ্জনঃ ।

লূকাররূপকো লব্ধধর্মমার্গপ্রবর্তকঃ ॥ ২১॥

একাধিপত্যসাম্রাজ্যপ্রদ এনৌঘনাশনঃ ।

একপাদ্যেক একোনবিংশতিমাসভুক্তিদঃ ॥ ২২॥

একোনবিংশতিবর্ষদশ এণাঙ্কপূজিতঃ ।

ঐশ্বর্যফলদ ঐন্দ্র ঐরাবতসুপূজিতঃ ॥ ২৩॥

ওংকার জপসুপ্রীত ওংকার পরিপূজিতঃ ।

ওংকারবীজ ঔদার্য হস্ত ঔন্নত্যদায়কঃ ॥ ২৪॥

ঔদার্যগুণ ঔদার্য শীল ঔষধকারকঃ ।

করপঙ্কজসন্নদ্ধধনুশ্চ করুণানিধিঃ ॥ ২৫॥

কালঃ কঠিনচিত্তশ্চ কালমেঘসমপ্রভঃ ।

কিরীটী কর্মকৃত্ কারয়িতা কালসহোদরঃ ॥ ২৬॥

কালাম্বরঃ কাকবাহঃ কর্মঠঃ কাশ্যপান্বয়ঃ ।

কালচক্রপ্রভেদী চ কালরূপী চ কারণঃ ॥ ২৭॥

কারিমূর্তিঃ কালভর্তা কিরীটমকুটোজ্বলঃ ।

কার্যকারণ কালজ্ঞঃ কাঞ্চনাভরথান্বিতঃ ॥ ২৮॥

কালদংষ্ট্রঃ ক্রোধরূপঃ করাळী কৃষ্ণকেতনঃ ।

কালাত্মা কালকর্তা চ কৃতান্তঃ কৃষ্ণগোপ্রিযঃ ॥ ২৯॥

কালাগ্নিরুদ্ররূপশ্চ কাশ্যপাত্মজসম্ভবঃ ।

কৃষ্ণবর্ণহযশ্চৈব কৃষ্ণগোক্ষীরসুপ্রিযঃ ॥ ৩০॥

কৃষ্ণগোঘৃতসুপ্রীতঃ কৃষ্ণগোদধিষুপ্রিযঃ ।

কৃষ্ণগাবৈকচিত্তশ্চ কৃষ্ণগোদানসুপ্রিযঃ ॥ ৩১॥

কৃষ্ণগোদত্তহৃদযঃ কৃষ্ণগোরক্ষণপ্রিযঃ ।

কৃষ্ণগোগ্রাসচিত্তস্য সর্বপীডানিবারকঃ ॥ ৩২॥

কৃষ্ণগোদান শান্তস্য সর্বশান্তি ফলপ্রদঃ ।

কৃষ্ণগোস্নান কামস্য গঙ্গাস্নান ফলপ্রদঃ ॥ ৩৩॥

কৃষ্ণগোরক্ষণস্যাশু সর্বাভীষ্টফলপ্রদঃ ।

কৃষ্ণগাবপ্রিযশ্চৈব কপিলাপশুষু প্রিযঃ ॥ ৩৪॥

কপিলাক্ষীরপানস্য সোমপানফলপ্রদঃ ।

কপিলাদানসুপ্রীতঃ কপিলাজ্যহুতপ্রিযঃ ॥ ৩৫॥

কৃষ্ণশ্চ কৃত্তিকান্তস্থঃ কৃষ্ণগোবৎসসুপ্রিযঃ ।

কৃষ্ণমাল্যাম্বরধরঃ কৃষ্ণবর্ণতনূরুহঃ ॥ ৩৬॥

কৃষ্ণকেতুঃ কৃশকৃষ্ণদেহঃ কৃষ্ণাম্বরপ্রিযঃ ।

ক্রূরচেষ্টঃ ক্রূরভাবঃ ক্রূরদংষ্ট্রঃ কুরূপি চ ॥ ৩৭॥

কমলাপতি সংসেব্যঃ কমলোদ্ভবপূজিতঃ ।

কামিতার্থপ্রদঃ কামধেনু পূজনসুপ্রিযঃ ॥ ৩৮॥

কামধেনুসমারাধ্যঃ কৃপাযুষ বিবর্ধনঃ ।

কামধেন্বৈকচিত্তশ্চ কৃপরাজ সুপূজিতঃ ॥ ৩৯॥

কামদোগ্ধা চ ক্রুদ্ধশ্চ কুরুবংশসুপূজিতঃ ।

কৃষ্ণাঙ্গমহিষীদোগ্ধা কৃষ্ণেন কৃতপূজনঃ ॥ ৪০॥

কৃষ্ণাঙ্গমহিষীদানপ্রিযঃ কোণস্থ এব চ ।

কৃষ্ণাঙ্গমহিষীদানলোলুপঃ কামপূজিতঃ ॥ ৪১॥

ক্রূরাবলোকনাৎসর্বনাশঃ কৃষ্ণাঙ্গদপ্রিযঃ ।

খদ্যোতঃ খণ্ডনঃ খড্গধরঃ খেচরপূজিতঃ ॥ ৪২॥

খরাংশুতনযশ্চৈব খগানাং পতিবাহনঃ ।

গোসবাসক্তহৃদযো গোচরস্থানদোষহৃত্ ॥ ৪৩॥

গৃহরাশ্যাধিপশ্চৈব গৃহরাজ মহাবলঃ ।

গৃধ্রবাহো গৃহপতির্গোচরো গানলোলুপঃ ॥ ৪৪॥

ঘোরো ঘর্মো ঘনতমা ঘর্মী ঘনকৃপান্বিতঃ ।

ঘননীলাম্বরধরো ঙাদিবর্ণ সুসংজ্ঞিতঃ ॥ ৪৫॥

চক্রবর্তিসমারাধ্যশ্চন্দ্রমত্যা সমর্চিতঃ ।

চন্দ্রমত্যার্তিহারী চ চরাচর সুখপ্রদঃ ॥ ৪৬॥

চতুর্ভুজশ্চাপহস্তশ্চরাচরহিতপ্রদঃ ।

ছাযাপুত্রশ্ছত্রধরশ্ছাযাদেবীসুতস্তথা ॥ ৪৭॥

জযপ্রদো জগন্নীলো জপতাং সর্বসিদ্ধিদঃ ।

জপবিধ্বস্তবিমুখো জম্ভারিপরিপূজিতঃ ॥ ৪৮॥

জম্ভারিবন্দ্যো জযদো জগজ্জনমনোহরঃ ।

জগত্রযপ্রকুপিতো জগত্ত্রাণপরাযণঃ ॥ ৪৯॥

জয়ো জয়প্রদশ্চৈব জগদানন্দকারকঃ ।

জ্যোতিশ্চ জ্যোতিষাং শ্রেষ্ঠো জ্যোতিঃশাস্ত্র প্রবর্তকঃ ॥ ৫০॥

ঝর্ঝরীকৃতদেহশ্চ ঝল্লরীবাদ্যসুপ্রিয়ঃ ।

জ্ঞানমূর্তির্জ্ঞানগম্যো জ্ঞানী জ্ঞানমহানিধিঃ ॥ ৫১ ॥

জ্ঞানপ্রবোধকশ্চৈব জ্ঞানদৃষ্ট্যাবলোকিতঃ ।

টঙ্কিতাখিললোকশ্চ টঙ্কিতৈনস্তমোরবিঃ ॥ ৫২ ॥

টঙ্কারকারকশ্চৈব টঙ্কৃতো টাম্ভদপ্রিয়ঃ ।

ঠকারময সর্বস্বষ্ঠকারকৃতপূজিতঃ ॥ ৫৩॥

ঢক্কাবাদ্যপ্রীতিকরো ডমড্ডমরুকপ্রিয়ঃ ।

ডম্বরপ্রভবো ডম্ভো ঢক্কানাদপ্রিযঙ্করঃ ॥ ৫৪ ॥

ডাকিনী শাকিনী ভূত সর্বোপদ্রবকারকঃ ।

ডাকিনী শাকিনী ভূত সর্বোপদ্রবনাশকঃ ॥ ৫৫॥

ঢকাররূপো ঢাম্ভীকো ণকারজপসুপ্রিয়ঃ ।

ণকারময়মন্ত্রার্থো ণকারৈকশিরোমণিঃ ॥ ৫৬॥

ণকারবচনানন্দো ণকারকরুণাময়ঃ ।

ণকারময সর্বস্বো ণকারৈকপরাযণঃ ॥ ৫৭॥

তর্জনীধৃতমুদ্রশ্চ তপসাং ফলদাযকঃ ।

ত্রিবিক্রমনুতশ্চৈব ত্রযীমযবপুর্ধরঃ ॥ ৫৮॥

তপস্বী তপসা দগ্ধদেহস্তাম্রাধরস্তথা ।

ত্রিকালবেদিতব্যশ্চ ত্রিকালমতিতোষিতঃ ॥ ৫৯॥

তুলোচ্চযস্ত্রাসকরস্তিলতৈলপ্রিযস্তথা ।

তিলান্ন সন্তুষ্টমনাস্তিলদানপ্রিযস্তথা ॥ ৬০॥

তিলভক্ষ্যপ্রিযশ্চৈব তিলচূর্ণপ্রিযস্তথা ।

তিলখণ্ডপ্রিযশ্চৈব তিলাপূপপ্রিযস্তথা ॥ ৬১॥

তিলহোমপ্রিযশ্চৈব তাপত্রযনিবারকঃ ।

তিলতর্পণসন্তুষ্টস্তিলতৈলান্নতোষিতঃ ॥ ৬২॥

তিলৈকদত্তহৃদযস্তেজস্বী তেজসান্নিধিঃ ।

তেজসাদিত্যসঙ্কাশস্তেজোময বপুর্ধরঃ ॥ ৬৩॥

তত্ত্বজ্ঞস্তত্ত্বগস্তীব্রস্তপোরূপস্তপোমযঃ ।

তুষ্টিদস্তুষ্টিকৃত্ তীক্ষ্ণস্ত্রিমূর্তিস্ত্রিগুণাত্মকঃ ॥ ৬৪॥

তিলদীপপ্রিয়শ্চৈব তস্য পীডানিবারকঃ।

তিলোত্তমামেনকাদিনর্তনপ্রিয় এব চ ॥ ৬৫॥

ত্রিভাগমষ্টবর্গশ্চ স্থূলরোমা স্থিরস্তথা।

স্থিতঃ স্থায়ী স্থাপকশ্চ স্থূলসূক্ষ্মপ্রদর্শকঃ ॥ ৬৬॥

দশরথার্চিতপাদশ্চ দশরথস্তোত্রতোষিতঃ।

দশরথ প্রার্থনাক্লৃপ্ত দুর্ভিক্ষ বিনিবারকঃ ॥ ৬৭॥

দশরথ প্রার্থনাক্লৃপ্ত বরদ্বয় প্রদায়কঃ।

দশরথস্বাত্মদর্শী চ দশরথাভীষ্টদায়কঃ ॥ ৬৮॥

দোর্ভির্ধনুর্ধরশ্চৈব দীর্ঘশ্মশ্রুজটাধরঃ।

দশরথস্তোত্রবরদো দশরথাভীপ্সিতপ্রদঃ ॥ ৬৯॥

দশরথস্তোত্রসন্তুষ্টো দশরথেন সুপূজিতঃ।

দ্বাদশাষ্টমজন্মস্থো দেবপুঙ্গবপূজিতঃ ॥ ৭০॥

দেবদানবদর্পঘ্নো দিনং প্রতিমুনিস্তুতঃ।

দ্বাদশস্থো দ্বাদশাত্মা সুতো দ্বাদশ নামভৃত্ ॥ ৭১॥

দ্বিতীয়স্থো দ্বাদশার্কসূনুর্দৈবজ্ঞপূজিতঃ।

দৈবজ্ঞচিত্তবাসী চ দময়ন্ত্যা সুপূজিতঃ ॥ ৭২॥

দ্বাদশাব্দংতু দুর্ভিক্ষকারী দুঃস্বপ্ননাশনঃ ।
দুরারাধ্যো দুরাধর্ষো দময়ন্তী বরপ্রদঃ ॥ ৭৩॥

দুষ্টদূরো দুরাচার শমনো দোষবর্জিতঃ ।
দুঃসহো দোষহন্তা চ দুর্লভো দুর্গমস্তথা ॥ ৭৪॥

দুঃখপ্রদো দুঃখহন্তা দীপ্তরঞ্জিত দিঙ্মুখঃ ।
দীপ্যমান মুখাম্ভোজো দময়ন্ত্যাঃ শিবপ্রদঃ ॥ ৭৫॥

দুর্নিরীক্ষ্যো দৃষ্টমাত্র দৈত্যমণ্ডলনাশকঃ ।
দ্বিজদানৈকনিরতো দ্বিজারাধনতৎপরঃ ॥ ৭৬॥

দ্বিজসর্বার্তিহারী চ দ্বিজরাজ সমর্চিতঃ ।
দ্বিজদানৈকচিত্তশ্চ দ্বিজরাজ প্রিয়ঙ্করঃ ॥ ৭৭॥

দ্বিজো দ্বিজপ্রিয়শ্চৈব দ্বিজরাজেষ্টদায়কঃ ।
দ্বিজরূপো দ্বিজশ্রেষ্ঠো দোষদো দুঃসহোঽপি চ ॥ ৭৮॥

দেবাদিদেবো দেবেশো দেবরাজ সুপূজিতঃ ।
দেবরাজেষ্ট বরদো দেবরাজ প্রিয়ঙ্করঃ ॥ ৭৯॥

দেবাদিবন্দিতো দিব্যতনুর্দেবশিখামণিঃ ।

দেবগানপ্রিযশ্চৈব দেবদেশিকপুঙ্গবঃ ॥ ৮০॥

দ্বিজাত্মজাসমারাধ্যো ধ্যেযো ধর্মী ধনুর্ধরঃ ।

ধনুষ্মান্ ধনদাতা চ ধর্মাধর্মবিবর্জিতঃ ॥ ৮১ ॥

ধর্মরূপো ধনুর্দিব্যো ধর্মশাস্ত্রাত্মচেতনঃ ।

ধর্মরাজ প্রিযকরো ধর্মরাজ সুপূজিতঃ ॥ ৮২ ॥

ধর্মরাজেষ্টবরদো ধর্মাভীষ্টফলপ্রদঃ ।

নিত্যতৃপ্তস্বভাবশ্চ নিত্যকর্মরতস্তথা ॥ ৮৩॥

নিজপীডার্তিহারী চ নিজভক্তেষ্টদাযকঃ ।

নির্মাসদেহো নীলশ্চ নিজস্তোত্র বহুপ্রিযঃ ॥ ৮৪ ॥

নলস্তোত্র প্রিযশ্চৈব নলরাজসুপূজিতঃ ।

নক্ষত্রমণ্ডলগতো নমতাং প্রিযকারকঃ ॥ ৮৫॥

নিত্যার্চিতপদাম্ভোজো নিজাজ্ঞা পরিপালকঃ ।

নবগ্রহবরো নীলবপুর্নলকরার্চিতঃ ॥ ৮৬॥

নলপ্রিযানন্দিতশ্চ নলক্ষেত্রনিবাসকঃ ।

নळপাক প্রিযশ্চৈব নळপড্ভঞ্জনক্ষমঃ ॥ ৮৭॥

নळসর্বার্তিহারী চ নळোেনাত্মার্থপূজিতঃ ।
নিপাটবীনিবাসশ্চ নळাাভীষ্টবরপ্রদঃ ॥ ৮৮॥

নळতীর্থসকৃত্ স্নান সর্বপীডানিবারকঃ ।
নळোেশদর্শনস্যাশু সাম্রাজ্যপদবীপ্রদঃ ॥ ৮৯॥

নক্ষত্ররাশ্যধিপশ্চ নীলধ্বজবিরাজিতঃ ।
নিত্যযোগরতশ্চৈব নবরত্নবিভূষিতঃ ॥ ৯০॥

নবধা ভজ্যদেহশ্চ নবীকৃতজগত্ত্রযঃ ।
নবগ্রহাধিপশ্চৈব নবাক্ষরজপপ্রিযঃ ॥ ৯১॥

নবাত্মা নবচক্রাত্মা নবতত্ত্বাধিপস্তথা ।
নবোদন প্রিযশ্চৈব নবধান্যপ্রিযস্তথা ॥ ৯২॥

নিষ্কণ্টকো নিস্পৃহশ্চ নিরপেক্ষো নিরামযঃ ।
নাগরাজার্চিতপদো নাগরাজপ্রিযঙ্করঃ ॥ ৯৩॥

নাগরাজেষ্টবরদো নাগাভরণ ভূষিতঃ ।
নাগেন্দ্রগান নিরতো নানাভরণভূষিতঃ ॥ ৯৪॥

নবমিত্র স্বরূপশ্চ নানাশ্চর্যবিধায়কঃ ।

নানাদ্বীপাধিকর্তা চ নানালিপিসমাবৃতঃ ॥ ৯৫॥

নানারূপ জগত্ স্রষ্টা নানারূপজনাশ্রয়ঃ ।

নানালোকাধিপশ্চৈব নানাভাষাপ্রিয়স্তথা ॥ ৯৬॥

নানারূপাধিকারী চ নবরত্নপ্রিয়স্তথা ।

নানাবিচিত্রবেষাঢ্যো নানাচিত্র বিধায়কঃ ॥ ৯৭॥

নীলজীমূতসঙ্কাশো নীলমেঘসমপ্রভঃ ।

নীলাঞ্জনচয়প্রখ্যো নীলবস্ত্রধরপ্রিয়ঃ ॥ ৯৮॥

নীচভাষা প্রচারজ্ঞো নীচে স্বল্পফলপ্রদঃ ।

নানাগম বিধানজ্ঞো নানানৃপসমাবৃতঃ ॥ ৯৯॥

নানাবর্ণাকৃতিশ্চৈব নানাবর্ণস্বরার্তবঃ ।

নাগলোকান্তবাসী চ নক্ষত্রত্রয়সংযুতঃ ॥ ১০০॥

নভাদিলোকসম্ভূতো নামস্তোত্রবহুপ্রিয়ঃ ।

নামপারায়ণপ্রীতো নামার্চনবরপ্রদঃ ॥ ১০১॥

নামস্তোত্রৈকচিত্তশ্চ নানারোগার্তিভঞ্জনঃ ।

নবগ্রহসমারাধ্যো নবগ্রহ ভযাপহঃ ॥ ১০২॥

নবগ্রহসুসম্পূজ্যো নানাবেদ সুরক্ষকঃ ।

নবগ্রহাধিরাজশ্চ নবগ্রহজপপ্রিযঃ ॥ ১০৩॥

নবগ্রহমযজ্যোতির্নবগ্রহ বরপ্রদঃ ।

নবগ্রহাণামধিপো নবগ্রহ সুপীডিতঃ ॥ ১০৪॥

নবগ্রহাধীশ্বরশ্চ নবমাণিক্যশোভিতঃ ।

পরমাত্মা পরব্রহ্ম পরমৈশ্বর্যকারণঃ ॥ ১০৫॥

প্রপন্নভযহারী চ প্রমত্তাসুরশিক্ষকঃ ।

প্রাসহস্তঃ পঙ্গুপাদঃ প্রকাশাত্মা প্রতাপবান্ ॥ ১০৬॥

পাবনঃ পরিশুদ্ধাত্মা পুত্রপৌত্র প্রবর্ধনঃ ।

প্রসন্নাৎসর্বসুখদঃ প্রসন্নেক্ষণ এব চ ॥ ১০৭॥

প্রজাপত্যঃ প্রিযকরঃ প্রণতেপ্সিতরাজ্যদঃ ।

প্রজানাং জীবহেতুশ্চ প্রাণিনাং পরিপালকঃ ॥ ১০৮॥

প্রাণরূপী প্রাণধারী প্রজানাং হিতকারকঃ ।

প্রাজ্ঞঃ প্রশান্তঃ প্রজ্ঞাবান্ প্রজারক্ষণদীক্ষিতঃ ॥ ১০৯॥

প্রাবৃষেণ্যঃ প্রাণকারী প্রসন্নোৎসববন্দিতঃ ।

প্রজ্ঞানিবাসহেতুশ্চ পুরুষার্থৈকসাধনঃ ॥ ১১০॥

প্রজাকরঃ প্রাতিকূল্যঃ পিঙ্গলাক্ষঃ প্রসন্নধীঃ ।

প্রপঞ্চাত্মা প্রসবিতা পুরাণ পুরুষোত্তমঃ ॥ ১১১॥

পুরাণ পুরুষশ্চৈব পুরুহূতঃ প্রপঞ্চধৃত্ ।

প্রতিষ্ঠিতঃ প্রীতিকরঃ প্রিযকারী প্রযোজনঃ ॥ ১১২॥

প্রীতিমান্ প্রবরস্তুত্যঃ পুরূরবসমর্চিতঃ ।

প্রপঞ্চকারী পুণ্যশ্চ পুরুহূত সমর্চিতঃ ॥ ১১৩॥

পাণ্ডবাদি সুসংসেব্যঃ প্রণবঃ পুরুষার্থদঃ ।

পযোদসমবর্ণশ্চ পাণ্ডুপুত্রার্তিভঞ্জনঃ ॥ ১১৪॥

পাণ্ডুপুত্রেষ্টদাতা চ পাণ্ডবানাং হিতঙ্করঃ ।

পঞ্চপাণ্ডবপুত্রাণাং সর্বাভীষ্টফলপ্রদঃ ॥ ১১৫॥

পঞ্চপাণ্ডবপুত্রাণাং সর্বারিষ্ট নিবারকঃ ।

পাণ্ডুপুত্রাদ্যর্চিতশ্চ পূর্বজশ্চ প্রপঞ্চভৃত্ ॥ ১১৬॥

পরচক্রপ্রভেদী চ পাণ্ডবেষু বরপ্রদঃ ।

পরব্রহ্ম স্বরূপশ্চ পরাজ্ঞা পরিবর্জিতঃ ॥ ১১৭॥

পরাৎপরঃ পাশহন্তা পরমাণুঃ প্রপঞ্চকৃত্ ।
পাতঙ্গী পুরুষাকারঃ পরশম্ভুসমুদ্ভবঃ ॥ ১১৮॥

প্রসন্নাৎসর্বসুখদঃ প্রপঞ্চোদ্ভবসম্ভবঃ ।
প্রসন্নঃ পরমোদারঃ পরাহঙ্কারভঞ্জনঃ ॥ ১১৯॥

পরঃ পরমকারুণ্যঃ পরব্রহ্মময়স্তথা ।
প্রপন্নভয়হারী চ প্রণতার্তিহরস্তথা ॥ ১২০॥

প্রসাদকৃত্ প্রপঞ্চশ্চ পরাশক্তি সমুদ্ভবঃ ।
প্রদানপাবনশ্চৈব প্রশান্তাত্মা প্রভাকরঃ ॥ ১২১॥

প্রপঞ্চাত্মা প্রপঞ্চোপশমনঃ পৃথিবীপতিঃ ।
পরশুরাম সমারাধ্যঃ পরশুরামবরপ্রদঃ ॥ ১২২॥

পরশুরাম চিরঞ্জীবিপ্রদঃ পরমপাবনঃ ।
পরমহংসস্বরূপশ্চ পরমহংসসুপূজিতঃ ॥ ১২৩॥

পঞ্চনক্ষত্রাধিপশ্চ পঞ্চনক্ষত্রসেবিতঃ ।
প্রপঞ্চ রক্ষিতশ্চৈব প্রপঞ্চস্য ভয়ঙ্করঃ ॥ ১২৪॥

ফলদানপ্রিযশ্চৈব ফলহস্তঃ ফলপ্রদঃ ।

ফলাভিষেকপ্রিযশ্চ ফল্গুনস্য বরপ্রদঃ ॥ ১২৫॥

ফুটচ্ছমিত পাপৌঘঃ ফল্গুনেন প্রপূজিতঃ ।

ফণিরাজপ্রিযশ্চৈব ফুল্লাম্বুজ বিলোচনঃ ॥ ১২৬॥

বলিপ্রিযো বলী বভ্রুর্ব্রহ্মবিষ্ণীশ ক্লেশকৃত্ ।

ব্রহ্মবিষ্ণীশরূপশ্চ ব্রহ্মশক্রাদিদুর্লভঃ ॥ ১২৭॥

বাসদষ্ট্যা প্রমেযাঙ্গো বিভ্রৎকবচকুণ্ডলঃ ।

বহুশ্রুতো বহুমতির্ব্রহ্মণ্যো ব্রাহ্মণপ্রিযঃ ॥ ১২৮॥

বলপ্রমথনো ব্রহ্মা বহুরূপো বহুপ্রদঃ ।

বালার্কদ্যুতিমান্বালো বৃহদ্বক্ষা বৃহত্তনুঃ ॥ ১২৯॥

ব্রহ্মাণ্ডভেদকৃচ্চৈব ভক্তসর্বার্থসাধকঃ ।

ভব্যো ভোক্তা ভীতিকৃচ্চ ভক্তানুগ্রহকারকঃ ॥ ১৩০॥

ভীষণো ভৈক্ষকারী চ ভূসুরাদি সুপূজিতঃ ।

ভোগভাগ্যপ্রদশ্চৈব ভস্মীকৃত জগত্ত্রযঃ ॥ ১৩১॥

ভযানকো ভানুসূনুর্ভূতিভূষিত বিগ্রহঃ ।

ভাস্বদ্রতো ভক্তিমতাং সুলভো ভ্রুকুটীমুখঃ ॥ ১৩২॥

ভবভূত গণৈঃস্তুত্যো ভূতসংঘসমাবৃতঃ ।

ভ্রাজিষ্ণুর্ভগবান্ভীমো ভক্তাভীষ্টবরপ্রদঃ ॥ ১৩৩॥

ভবভক্তৈকচিত্তশ্চ ভক্তিগীতস্তবোন্মুখঃ ।

ভূতসন্তোষকারী চ ভক্তানাং চিত্তশোধনঃ ॥ ১৩৪॥

ভক্তিগম্যো ভযহরো ভাবজ্ঞো ভক্তসুপ্রিযঃ ।

ভূতিদো ভূতিকৃদ্ ভোজ্যো ভূতাত্মা ভুবনেশ্বরঃ ॥ ১৩৫॥

মন্দো মন্দগতিশ্চৈব মাসমেব প্রপূজিতঃ ।

মুচুকুন্দ সমারাধ্যো মুচুকুন্দ বরপ্রদঃ ॥ ১৩৬॥

মুচুকুন্দার্চিতপদো মহারূপো মহাযশাঃ ।

মহাভোগী মহাযোগী মহাকাযো মহাপ্রভুঃ ॥ ১৩৭॥

মহেশো মহদৈশ্বর্যো মন্দার কুসুমপ্রিযঃ ।

মহাক্রতুর্মহামানী মহাধীরো মহাজযঃ ॥ ১৩৮॥

মহাবীরো মহাশান্তো মণ্ডলস্থো মহাদ্যুতিঃ ।

মহাসুতো মহোদারো মহনীযো মহোদযঃ ॥ ১৩৯॥

মৈথিলীবরদাযী চ মার্তাণ্ডস্য দ্বিতীযজঃ ।

মৈথিলীপ্রার্থনাকৢপ্ত দশকণ্ঠ শিরোপহৃত্ ॥ ১৪০॥

মরামরহরারাধ্যো মহেন্দ্রাদি সুরার্চিতঃ ।

মহারথো মহাবেগো মণিরত্নবিভূষিতঃ ॥ ১৪১॥

মেষনীচো মহাঘোরো মহাসৌরির্মনুপ্রিযঃ ।

মহাদীর্ঘো মহাগ্রাসো মহদৈশ্বর্যদাযকঃ ॥ ১৪২॥

মহাশুষ্কো মহারৌদ্রো মুক্তিমার্গ প্রদর্শকঃ ।

মকরকুম্ভাধিপশ্চৈব মৃকণ্ডুতনযার্চিতঃ ॥ ১৪৩॥

মন্ত্রাধিষ্ঠানরূপশ্চ মল্লিকাকুসুমপ্রিযঃ ।

মহামন্ত্র স্বরূপশ্চ মহাযন্ত্রস্থিতস্তথা ॥ ১৪৪॥

মহাপ্রকাশদিব্যাত্মা মহাদেবপ্রিযস্তথা ।

মহাবলি সমারাধ্যো মহর্ষিগণপূজিতঃ ॥ ১৪৫॥

মন্দচারী মহামাযী মাষদানপ্রিযস্তথা ।

মাষোদন প্রীতচিত্তো মহাশক্তির্মহাগুণঃ ॥ ১৪৬॥

যশস্করো যোগদাতা যজ্ঞাঙ্গোঽপি যুগন্ধরঃ ।

যোগী যোগ্যশ্চ যাম্যশ্চ যোগরূপী যুগাধিপঃ ॥ ১৪৭॥

যজ্ঞভৃদ্ যজমানশ্চ যোগো যোগবিদাং বরঃ ।
যক্ষরাক্ষসবেতাল কূষ্মাণ্ডাদিপ্রপূজিতঃ ॥ ১৪৮॥

যমপ্রত্যধিদেবশ্চ যুগপদ্ ভোগদায়কঃ ।
যোগপ্রিয়ো যোগযুক্তো যজ্ঞরূপো যুগান্তকৃত্ ॥ ১৪৯॥

রঘুবংশ সমারাধ্যো রৌদ্রো রৌদ্রাকৃতিস্তথা ।
রঘুনন্দন সল্লাপো রঘুপ্রোক্ত জপপ্রিয়ঃ ॥ ১৫০॥

রৌদ্ররূপী রথারূঢো রাঘবেষ্ট বরপ্রদঃ ।
রথী রৌদ্রাধিকারী চ রাঘবেণ সমর্চিতঃ ॥ ১৫১॥

রোষাৎসর্বস্বহারী চ রাঘবেণ সুপূজিতঃ ।
রাশিদ্বযাধিপশ্চৈব রঘুভিঃ পরিপূজিতঃ ॥ ১৫২॥

রাজ্যভূপাকরশ্চৈব রাজরাজেন্দ্র বন্দিতঃ ।
রত্নকেযূরভূষাঢ্যো রমানন্দনবন্দিতঃ ॥ ১৫৩॥

রঘুপৌরুষসন্তুষ্টো রঘুস্তোত্রবহুপ্রিয়ঃ ।
রঘুবংশনৃপৈঃপূজ্যো রণন্মঞ্জীরনূপুরঃ ॥ ১৫৪॥

রবিনন্দন রাজেন্দ্রো রঘুবংশপ্রিয়স্তথা ।
লোহজপ্রতিমাদানপ্রিয়ো লাবণ্যবিগ্রহঃ ॥ ১৫৫॥

লোকচূডামণিশ্চৈব লক্ষ্মীবাণীস্তুতিপ্রিয়ঃ ।
লোকরক্ষো লোকশিক্ষো লোকলোচনরঞ্জিতঃ ॥ ১৫৬॥

লোকাধ্যক্ষো লোকবন্দ্যো লক্ষ্মণাগ্রজপূজিতঃ ।
বেদবেদ্যো বজ্রদেহো বজ্রাঙ্কুশধরস্তথা ॥ ১৫৭॥

বিশ্ববন্দ্যো বিরূপাক্ষো বিমলাঙ্গবিরাজিতঃ ।
বিশ্বস্থো বাযসারূঢো বিশেষসুখকারকঃ ॥ ১৫৮॥

বিশ্বরূপী বিশ্বগোপ্তা বিভাবসু সুতস্তথা ।
বিপ্রপ্রিয়ো বিপ্ররূপো বিপ্রারাধন তৎপরঃ ॥ ১৫৯॥

বিশালনেত্রো বিশিখো বিপ্রদানবহুপ্রিয়ঃ ।
বিশ্বসৃষ্টি সমুদ্ভূতো বৈশ্বানরসমদ্যুতিঃ ॥ ১৬০॥

বিষ্ণুর্বিরিঞ্চির্বিশ্বেশো বিশ্বকর্তা বিশাম্পতিঃ ।
বিরাডাধারচক্রস্থো বিশ্বভুগ্বিশ্বভাবনঃ ॥ ১৬১॥

বিশ্বব্যাপারহেতুশ্চ বক্রক্রূরবিবর্জিতঃ ।

বিশ্বোদ্ভবো বিশ্বকর্মা বিশ্বসৃষ্টি বিনাযকঃ ॥ ১৬২॥

বিশ্বমূলনিবাসী চ বিশ্বচিত্রবিধাযকঃ ।

বিশ্বাধারবিলাসী চ ব্যাসেন কৃতপূজিতঃ ॥ ১৬৩॥

বিভীষণেষ্টবরদো বাঞ্ছিতার্থপ্রদাযকঃ ।

বিভীষণসমারাধ্যো বিশেষসুখদাযকঃ ॥ ১৬৪॥

বিষমব্যযাষ্টজন্মস্থোঽপ্যেকাদশফলপ্রদঃ ।

বাসবাত্মজসুপ্রীতো বসুদো বাসবার্চিতঃ ॥ ১৬৫॥

বিশ্বত্রাণৈকনিরতো বাঙ্মনোতীতবিগ্রহঃ ।

বিরাণ্মন্দিরমূলস্থো বলীমুখসুখপ্রদঃ ॥ ১৬৬॥

বিপাশো বিগতাতঙ্কো বিকল্পপরিবর্জিতঃ ।

বরিষ্ঠো বরদো বন্দ্যো বিচিত্রাঙ্গো বিরোচনঃ ॥ ১৬৭॥

শুষ্কোদরঃ শুক্লবপুঃ শান্তরূপী শনৈশ্চরঃ ।

শূলী শরণ্যঃ শান্তশ্চ শিবাযামপ্রিযঙ্করঃ ॥ ১৬৮॥

শিবভক্তিমতাং শ্রেষ্ঠঃ শূলপাণী শুচিপ্রিযঃ ।

শ্রুতিস্মৃতিপুরাণজ্ঞঃ শ্রুতিজালপ্রবোধকঃ ॥ ১৬৯॥

শ্রুতিপারগ সম্পূজ্যঃ শ্রুতিশ্রবণলোলুপঃ ।

শ্রুত্যন্তর্গতমর্মজ্ঞঃ শ্রুত্যেষ্টবরদাযকঃ ॥ ১৭০॥

শ্রুতিরূপঃ শ্রুতিপ্রীতঃ শ্রুতীপ্সিতফলপ্রদঃ ।

শুচিশ্রুতঃ শান্তমূর্তিঃ শ্রুতিশ্রবণকীর্তনঃ ॥ ১৭১॥

শমীমূলনিবাসী চ শমীকৃতফলপ্রদঃ ।

শমীকৃতমহাঘোরঃ শরণাগতবৎসলঃ ॥ ১৭২॥

শমীতরুস্বরূপশ্চ শিবমন্ত্রজ্ঞমুক্তিদঃ ।

শিবাগমৈকনিলযঃ শিবমন্ত্রজপপ্রিযঃ ॥ ১৭৩॥

শমীপত্রপ্রিযশ্চৈব শমীপর্ণসমর্চিতঃ ।

শতোপনিষদস্তুত্যঃ শান্ত্যাদিগুণভূষিতঃ ॥ ১৭৪॥

শান্ত্যাদিষড্গুণোপেতঃ শঙ্খবাদ্যপ্রিযস্তথা ।

শ্যামরক্তসিতজ্যোতিঃ শুদ্ধপঞ্চাক্ষরপ্রিযঃ ॥ ১৭৫॥

শ্রীহালাস্যক্ষেত্রবাসী শ্রীমান্ শক্তিধরস্তথা ।

ষোডশদ্বযসম্পূর্ণলক্ষণঃ ষণ্মুখপ্রিযঃ ॥ ১৭৬॥

ষড্গুণৈশ্বর্যসংযুক্তঃ ষডঙ্গাবরণোজ্জ্বলঃ ।

ষডক্ষরস্বরূপশ্চ ষটচক্রোপরি সংস্থিতঃ ॥ ১৭৭॥

ষোডশী ষোডশান্তশ্চ ষটশক্তিব্যক্তমূর্তিমান্ ।
ষড্ভাবরহিতশ্চৈব ষডঙ্গশ্রুতিপারগঃ ॥ ১৭৮॥

ষটেকাণমধ্যনিলয়ঃ ষটশাস্ত্রস্মৃতিপারগঃ ।
স্বর্ণেন্দ্রনীলমকুটঃ সর্বাভীষ্টপ্রদায়কঃ ॥ ১৭৯॥

সর্বাত্মা সর্বদোষঘ্নঃ সর্বগর্বপ্রভঞ্জনঃ ।
সমস্তলোকাভয়দঃ সর্বদোষাঙ্গনাশকঃ ॥ ১৮০॥

সমস্তভক্তসুখদঃ সর্বদোষনিবর্তকঃ ।
সর্বনাশক্ষমঃ সৌম্যঃ সর্বক্লেশনিবারকঃ ॥ ১৮১॥

সর্বাত্মা সর্বদা তুষ্টঃ সর্বপীডানিবারকঃ ।
সর্বরূপী সর্বকর্মা সর্বজ্ঞঃ সর্বকারকঃ ॥ ১৮২॥

সুকৃতী সুলভশ্চৈব সর্বাভীষ্টফলপ্রদঃ ।
সূর্যাত্মজঃ সদাতুষ্টঃ সূর্যবংশপ্রদীপনঃ ॥ ১৮৩॥

সপ্তদ্বীপাধিপশ্চৈব সুরাসুরভযঙ্করঃ ।
সর্বসংক্ষোভহারী চ সর্বলোকহিতঙ্করঃ ॥ ১৮৪॥

সর্বৌদার্যস্বভাবশ্চ সন্তোষাৎসকলেষ্টদঃ ।

সমস্তঋষিভিঃস্তুত্যঃ সমস্তগণপাবৃতঃ ॥ ১৮৫॥

সমস্তগণসংসেব্যঃ সর্বারিষ্টবিনাশনঃ ।

সর্বসৌখ্যপ্রদাতা চ সর্বব্যাকুলনাশনঃ ॥ ১৮৬॥

সর্বসংক্ষোভহারী চ সর্বারিষ্ট ফলপ্রদঃ ।

সর্বব্যাধিপ্রশমনঃ সর্বমৃত্যুনিবারকঃ ॥ ১৮৭॥

সর্বানুকূলকারী চ সৌন্দর্যমৃদুভাষিতঃ ।

সৌরাষ্ট্রদেশোদ্ভবশ্চ স্বক্ষেত্রেষ্টবরপ্রদঃ ॥ ১৮৮॥

সোমযাজি সমারাধ্যঃ সীতাভীষ্ট বরপ্রদঃ ।

সুখাসনোপবিষ্টশ্চ সদ্যঃপীডানিবারকঃ ॥ ১৮৯॥

সৌদামনীসন্নিভশ্চ সর্বানুল্লঙ্ঘ্যশাসনঃ ।

সূর্যমণ্ডলসঞ্চারী সংহারাস্ত্রনিযোজিতঃ ॥ ১৯০॥

সর্বলোকক্ষযকরঃ সর্বারিষ্টবিধাযকঃ ।

সর্বব্যাকুলকারী চ সহস্রজপসুপ্রিযঃ ॥ ১৯১॥

সুখাসনোপবিষ্টশ্চ সংহারাস্ত্রপ্রদর্শিতঃ ।

সর্বালঙ্কার সংযুক্তকৃষ্ণগোদানসুপ্রিয়ঃ ॥ ১৯২॥

সুপ্রসন্নঃ সুরশ্রেষ্ঠঃ সুঘোষঃ সুখদঃ সুহৃত্ ।
সিদ্ধার্থঃ সিদ্ধসঙ্কল্পঃ সর্বজ্ঞঃ সর্বদঃ সুখী ॥ ১৯৩॥

সুগ্রীবঃ সুধৃতিঃ সারঃ সুকুমারঃ সুলোচনঃ ।
সুব্যক্তঃ সচ্চিদানন্দঃ সুবীরঃ সুজনাশ্রয়ঃ ॥ ১৯৪॥

হরিশ্চন্দ্রসমারাধ্যো হেয়োপাদেযবর্জিতঃ ।
হরিশ্চন্দ্রেষ্টবরদো হংসমন্ত্রাদি সংস্তুতঃ ॥ ১৯৫॥

হংসবাহ সমারাধ্যো হংসবাহবরপ্রদঃ ।
হৃদ্যো হৃষ্টো হরিসখো হংসো হংসগতির্হবিঃ ॥ ১৯৬॥

হিরণ্যবর্ণো হিতকৃদ্ধর্ষদো হেমভূষণঃ ।
হবির্হোতা হংসগতির্হংসমন্ত্রাদিসংস্তুতঃ ॥ ১৯৭॥

হনূমদর্চিতপদো হলধৃত্ পূজিতঃ সদা ।
ক্ষেমদঃ ক্ষেমকৃৎক্ষেম্যঃ ক্ষেত্রজ্ঞঃ ক্ষামবর্জিতঃ ॥ ১৯৮॥

ক্ষুদ্রঘ্নঃ ক্ষান্তিদঃ ক্ষেমঃ ক্ষিতিভূষঃ ক্ষমাশ্রয়ঃ ।
ক্ষমাধরঃ ক্ষযদ্বারো নাম্নামষ্টসহস্রকম্ ॥ ১৯৯॥

বাক্যেনৈকেন বক্ষ্যামি বাঞ্ছিতার্থং প্রযচ্ছতি।
তস্মাৎসর্বপ্রযত্নেন নিযমেন জপেৎসুধীঃ ॥ ২০০॥

॥ ইতি শনৈশ্চরসহস্রনামস্তোত্রং সম্পূর্ণম্ ॥

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Shanaishchara Sahasranama Stotram Lyrics in Bengali PDF
% File name : shanaishcharasahasra.itx
% Category : sahasranAma
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Kirk Wortman kirkwort at hotmail.com
% Proofread by : Kirk Wortman kirkwort at hotmail.com
% Latest update : April 11, 2007
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website